

kulgam 1.pdf **Title : Atma Bodha Akhya Grantha (Shri Shankaracharya) (Devanagari)**



वित्सर्वगतोऽमृतो भवेत् ॥ ६८ ॥ नन्वात्मनोऽज्ञान
प्रतिबन्धकोदुरितपरिहारार्थं प्रयागतीर्थयात्रो
द्योगः कर्तव्य इत्याशंक्यात्मतीर्थ स्नायतस्नातस्य
न किंचित्कर्तव्यमित्याह दिगिति यो विनिष्क्रियः
परमहंसः स्वात्मतीर्थं भजते स सर्ववित्सर्वगतः
सर्वत्र परमार्थस्वरूपत्वात् अमृतो मुक्तो भवेत् क
थंभूतं स्वात्मतीर्थं दिग्देशकालाद्यनपेक्ष्य मेव
सर्वगं शीतादीनि द्वंद्वदुःखानि हरतीति शी
तादिहृत् नित्यसुखं मोक्षानन्दप्रापकत्वात्
इतरतीर्थेषु तद्विपरीतं द्रष्टव्यम् स्वत आत्मतीर्थ
स्नानस्य न किंचिदवशिष्यते इति भावः ॥
६८ ॥ आत्मबोधाख्यो ग्रन्थः शंकराचार्य
विरचितस्समाप्तः ॥ शुभम् ॥ ॥ श्री



स्नानस्य न किंचिदवशिष्यते इति भावः ॥
६८ ॥ आत्मबोधाख्यो ग्रन्थः शंकराचार्य
विरचितस्समाप्तः ॥ शुभम् ॥ ॥ श्री

ॐ स्वस्ति प्रजाभ्यः ॥ श्रीगणेशा नमः ॥ ॐ
ज्ञानमखण्डमजितपारं ज्ञानघनमनसाध्यगो
चराकारम् । विकसितजलरुहनेत्रमुमार्थ
याङ्कमाश्रये ज्ञाम्यम ॥
इह भगवाञ्छङ्कराचार्य उत्तमाधिकारिणो वेदान्त
प्रस्तावत्रयं निर्माय तत्रवलोकनासमर्थानां म
न्दमतीनामनुग्रहार्थं सर्ववेदान्तसिद्धान्तस्वरू
पं आत्मबोधाख्यं प्रकरणं निदर्शयितुः प्रति
आ॰ जानीते ॥ तपोभिः क्षीणपापानां शान्ता
बो॰ नां वीतरागिणाम् । मुमुक्षूणामपेक्षोयमा
१

त्मबोधं विधीयते ॥१॥ कस्मात्काम्यनित्य
नैमित्तिकाद्यनुष्ठानरूपैस्तपोभिः क्षीणपापा
नि रागाद्यन्तःकरणदोषाः तेषां नित्यनैमि
त्तिकैरेव क्षीणत्वात् दुरितक्षयमितिवचनात् ए
त एव शान्तानामतोऽभिनाश्रयानां वीतरागि
णामिहामुत्रफलभोगरहितानां मुमुक्षूणां सं
सारग्रन्थिभेदने कृतप्रयत्नानां यथोक्तसाध
नसम्पन्नानामयमात्मबोधो विधीयते विधि
मुखेनावकाशनया प्रतिपाद्यत इत्यर्थः १॥
बोधोन्यसाधनेभ्यो हि साक्षान्मोक्षैकसा
धनम् पाकस्य वह्निवज्ज्ञानं विना मोक्षो न

ति तद्ज्ञानं विना मोक्षो न सिध्यतीत्यर्थः॥२॥
अविरोधितया कर्म नाविद्यां विनिवर्तयेत्।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत्॥३॥
ननु कर्मणां विचित्रशक्तिमत्वात्कर्मैव किंचिद
ज्ञानं नाशयिष्यतीति तत्किमात्मज्ञानेनेत्याशं
क्य कर्माज्ञानयोर्विरोधाभावान्नैवमित्याह अ
विरोधितयेति कर्मणो विद्याविरोधाभावाद
ज्ञानं नाशयितुं नोत्सहते विद्यायाविकार
रूपत्वात् अन्धतमसस्तेजःपुञ्ज इव नाशयि

नुं समर्थ इत्यर्थः ॥ परिच्छिन्न इवाज्ञानात्तन्ना
शे सति केवलः स्वयं प्रकाशते ह्यात्मा मे
घापायेंऽशुमानिव ॥ ४५ ननु प्रति शरीरमा
त्मा परिच्छिन्न एवोपलक्ष्यते कथमस्य केव
ल्यमित्यत आह परिच्छिन्न इवेति अपरि
च्छिन्नस्य परिपूर्णस्याद्वितीयस्यात्मनः
ज्ञानपरिकल्पितो भाव शरीरा व्याहत
नपरिच्छिन्नत्वमविवेककृतमेव न तत्त्वदृष्ट्या
अतो विवेकदयान्नाशादात्मा केवल एवस्

कारणते मेघावरणाभावे भानुवदित्यर्थः॥४॥
अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलं
कृत्वाज्ञानं स्वयंनश्येजलेकतकरेणुवत्॥५
नन्वात्मनोद्वैतसिद्धिरयुक्ता इतिज्ञानेनद्वैतसि
द्धेरित्यत्राह अज्ञानेति अज्ञानकार्यश्चैरहं
मादिभिः कलुषीकृतं कर्तृत्वभोक्तृत्वाद्यभि
मानिनं जीवं ज्ञानं कर्तृ चिरकालाभ्यासात्
अज्ञानहननद्वारा तत्कार्यान्तःकरणादिकं
निःशेषं नाशयित्वा स्वयमेव नश्यति अ

त्वानकार्यत्वान् तद्वत्ज्ञानविस्थितज्ञानेनात्मा
प्रकाशते यथा कतकरेणुराविलंजलं निर्मलं
कृत्वा स्वयमेव न भवति तद्वदित्यर्थः ५॥
संसारः स्वप्नतुल्योहि रागद्वेषादिसंकुलः
स्वकाले सत्यवद्भाति प्रबोधेसत्यवद्भवेत् ॥६
ननु अपरोक्षतया अनुभूयमानस्य संसार
स्य कथमत्यन्ताभाववत्त्वं सत्यत्वविरुद्धमित्या
शंकास्वप्नदृष्टान्तेनास्य मिथ्यात्वं साधयति
संसार इति रागद्वेषादिभिः संकुलयमानः

आ°
बो°
४

स्वकाले स्वस्य कारणभूताज्ञाने स्थिते सति
तावत् मिथ्याभूतोपि संसारः सन्निवाभा
ति प्रबोधे सति वाक्यश्रवणादात्मज्ञानो
त्पत्तौ असन्नेव भाति स्वप्नतुल्य इति तत्र
दृष्टान्तः स्वप्न इति स्वप्नो हि यावन्निद्राना
नुभूयते तावन्मिथ्याभूतोपि सत्य इवाभा
ति प्रबोधे निद्रानाशे मिथ्या तद्वदित्यर्थः
तदुक्तं उपादाने किलाधारे जगन्ति पर
मेश्वरे सर्वं स्थितिलयं यान्ति बुद्बुदा इव

वाधिता ६॥ तावन्मात्वं जगज्जानि प्रतीति

कारजनं यथा यावन्नज्ञायते ब्रह्म सर्वा

धिष्ठानमद्वयम् ॥७॥ जगन्मिथ्यात्वमेव

दृष्टान्तेन द्रढयति तावदिति यथा याव

न्नीलपृष्ठत्रिकोणादिविशेषज्ञानंनोत्प

द्यते तावद्रजतज्ञानं सत्यमेवानुभूयते न

या सर्वाधिष्ठानभूतं सच्चिदानन्दाद्वयं ब्रह्म

श्री° यावन्नज्ञायते साक्षान्नानुभूयते तावज्जग

बो° ५

दाकारस्तोपरिणामः संसारः सत्यइवभ्रान्त्याद
श्यतेइत्यर्थः ७॥ सच्चिदात्मन्यनुस्यूतेनि
त्येविष्णोप्रकल्पिताः व्यक्तयोविविधाः
सर्वाहाटकेकटकादिवत्॥ ८॥ सर्वंदृश्यं
प्रपञ्चजातंब्रह्मण्येवमायाकल्पितमिति
प्रतिपादयति सदिति सत्यज्ञानानन्दात्म
नि नित्येसर्वानुस्यूते विष्णौव्यापके ब्रह्म
णि सर्वादेवतिर्यङ्नरस्थावरजङ्गमाद

योविविधाश्रपिव्यक्तयः सर्वोपाधानभूतेपर
मेश्वरे हेम्नि कटकमुकुटादिवकल्पिताएव वे
त्तानभिन्नाऽन्यार्थः ॥ उक्तमर्थमाकाशमाह
घटान्तेनद्दृश्यन्ति यथेति ॥८॥ यथाकाशो
हृषीकेशो नानोपाधिगतोविभुः तद्भेदा
च्छिन्नवद्भाति तन्नाशे केवलोभवेत् ॥९॥
हृषीकेशोमनः प्रभृति सर्वेन्द्रियप्रवर्त्तको
नियामकोवाविभुः सर्वगतः परमेश्वरः स

या॰
टी॰
१२

मायया परिकल्पितः नानोपाधिषु प्रतिबिंबि

तः सन्नानेव भाति तत्त्वाभावे सति ब्रह्मात्मैकत्वाने

न तेषां मायापरिकल्पितदेहाद्युपाधीनां ना

शे सति केवल एक एव भाति यथै वाका शो

घटपटादिषु एक एव नानाविधो भवति उपा

धिलयादेक एव भवति तद्वदित्यर्थः ॥१९॥ ना

नोपाधिवशादेव जाति नामाश्रमादयः ॥ आ

त्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥२०॥

ननु सर्वदेहेषु तत्तज्जात्यादिभिरनुष्ठद्धस्य कथं

नित्यमुक्तोना उच्यते तत्राहु नानोपाधिरिति ।
इत्यौक्तनानोपाधिवशादेवात्मनि जातिनामा
श्रमादय आरोपिता मायाकल्पिता: ननु तत:
यथा स्वभावमधुरं जलं कटुतिक्तमधुराम्लरक्त
पीतादिद्रव्योपेतं सत्तत्तद्रूपं भवति ननु स्वरूपे
ण तद्वदित्यर्थः १०॥ पंचीकृतमहाभूतसंभ
वं कर्मसञ्चितम् शरीरं सुखदुःखानां भो
गायतनमुच्यते ॥ ११॥ आत्मनो विद्यापरि
कल्पितोपाधित्रयमध्ये स्थूलोपाधिमाह ॥

मेचीकृतेति पञ्चानां भूतानां प्रत्येकं द्विधा वि
भज्य तत्रैकमर्धं चतुर्धा विभज्य स्वार्धपरित्य
ज्य तेषु स्वयोजनं पञ्चीकरणं एवं पञ्चीकृ
तेभ्यः स्थूलसृष्ट्यादिमहाभूतेभ्यः सम्भवो
यस्य प्रारब्धकर्मभिः सञ्चितं पचितं स्थूल
शरीरं सुखदुःखानामायतनं भोगस्था
नं प्रत्यगात्मन इति ॥१॥ पञ्चप्राणम
नोबुद्धिदशेन्द्रियसमन्वितम् अपञ्ची
कृतभूतोत्थं सूक्ष्मांगं भोगसाधनम् ॥२॥

स्त्मोपाधिमाह ॥ पंचीति मव्व प्राणा एक

स्यैव महाप्राणस्यवृत्तय: ज्ञानेन्द्रिय कर्मे

न्द्रियभेदेनेन्द्रियाणि दश मन: शब्देन सं

कल्पविकल्पात्मान्त: करणवृत्ति: बुद्धि

र्निश्चयात्मिका एतै: संयुक्तम पञ्चीकृ

तसूक्ष्मभूतोत्थं ज्ञानं सूक्ष्मांणं लिङ्गशरी

रं सुखदु:खभोगसाधनमुच्यते इत्यर्थ: ॥२॥

तृतीयं कारणोपाधिमाह ॥ अनाद्यवि

द्यानिर्वाच्या कारणोपाधिरुच्यते उपा

शां॰
वे॰
८

धित्रितयादन्यदात्मानमवधारयेत् ॥ १५
स्वस्वरूपाज्ञानमनिर्वाच्याऽविद्यानादिभूता
कारणोपाधिरुच्यते सा च व्यष्टिभेदेन स्थू
लसूक्ष्मप्रपञ्चयोः कारणभूतत्वात्कारणो
पाधिरुच्यते उपाधित्रितयकथने प्रयोज
नमाह उपाधित्रितयादन्यदिति तस्माद्वि
णामात्मानमवधारयेदित्यर्थः १५॥ पंच
कोशादियोगेन तत्तन्मय इव स्थितः शु
द्धात्मा नीलवस्त्रादियोगेन स्फाटिको य

ध्या॥ध्ना॥ नन्वन्नमयादिकोशेषु व्याप्यनत्त
न्म घतया स्थितस्य कुतो नित्यत्वमुच्यते इत्या
शंक्याह पंचकोशादिति अन्नमयप्राणम
यमनोमयविज्ञानमयानन्दमयाः पञ्चको
शाः आदिशब्देनाशनपिपासादीनां ग्रह
णं एतैर्योगेन मिथ्या तादात्म्येन तत्तन्म
य इव स्थितः आत्मा शुद्धः नन्वेतेषु वस्तुनो
रञ्जितः वेदा अपि सत्त्वं शुद्धबोधान्नरसमय
इत्यादिभिः सत्त्ववस्तुदर्शनार्थमेवोया

ध्या॰
कौ॰
१८

थिस्यं शब्द सूचयति ननु नचूहष्टा यथाति
मेलस्फटिकोनीलपीतादिवस्त्रयोगेन न
त्तन्मय इवाभाति वस्तुतोनास्ति निरञ्जन
त्वात्तद्वदित्यर्थः ॥ १४ ॥ वपुस्तुषादिभिः
कोशैर्युक्तं युक्त्यावघातनः आत्मानम
न्तरं शुद्धं विविच्यात् तण्डुलं यथा ॥ १५ ॥
अथ संगात्मस्वरूपस्तानविवेचनप्रकारमाहुव
पुरिति पंचकोशैस्तावदात्मनिस्थितं वपुः
स्थूलं शरीरं तुषादिभिर्युक्तो तण्डुलमिव

युक्त्या वज्ञानतो वह्न्यनुमानात्मानं न तु ल
भिवा विविच्याद्विवेकेन जानीयात् कथमि
त्थं स्थूलदेहो नात्मभूतो नात्मभूतकार्य
त्वात् घटवत् सूक्ष्मदेहोपितद्वत् अनात्म
देहत्वात् स्थूलदेहवदित्यनुमानादिना
तेभ्यः कोशादिभ्यो भिन्नमात्मानं विवि
च्य जानीयादित्यर्थः ॥१७॥ सदा सर्वगतो
१० प्यात्मा न सर्वत्रावभासते बुद्धावेवावभा
सेत स्वच्छेषु प्रतिबिंबवत् ॥ १८ ॥ नन्वा

त्मा सर्वगतस्तर्हि [illegible] सर्वत्र सर्वैः किं न दृश्य
ते इत्यत्राह सदेति आत्मा सर्वगतोपि सर्वत्र
व्याप्य स्थितोपि नैर्बहिः प्रवृत्तादेर्न प्रकाश्य
ते रागादिभिरविद्यायां बुद्धावेवावभासते न
सर्वत्र यथा प्रतिबिंबः स्वच्छेष्वेव दर्पणादि
षु दृश्यते नान्यत्र तद्वदित्यर्थः ॥ १७ ॥ ॥
देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम्
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १८

देहेन्द्रियेति देहे स्थितस्याप्यात्मनः औदासीन्यं
राजपुरुषदृष्टान्तेनाह देहेन्द्रियमनोबुद्धिप्रकृ
तिभ्यो जडपदार्थानामिदृश्येभ्यो विलक्षणं शु
द्धात्मानं तद्वृत्तीनां साक्षित्वेनास्थितं यथा
राजा स्वनगरे स्थितेषु मन्त्रिषु प्रवर्तमानेषु
स्वयं साक्षितया तान्पश्यंस्तिष्ठति तद्वदेनं
जानीयादित्यर्थः ॥ १७ ॥ तदुक्तं श्रीवासिष्ठे
पि तद्वृत्तिसाक्षी विज्ञेयः सर्वात्मा राजवत्स
दा ॥

आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः
स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः १८
नन्वात्मनो विकारित्वमयुक्तं सर्वदा व्यापारवा
न्दृश्यते तत्राह नित्यज्ञानस्वरूपमात्मचैतन्य तिचे
माश्रित्य देहेन्द्रियमनोबुद्ध्यादयः स्वकीयार्थे
षु व्यवहरन्ति यथा जनाः प्राणिनः सूर्यप्रका
शमाश्रित्य स्वव्यापारेषु व्यवहरन्ति अनेनचैत
न्यत्वात् आत्मन एव देहेन्द्रियास्तु सर्वे

इत्यर्थः ॥२८॥ देहेन्द्रियगुणान्कर्माण्यमलेस
च्चिदात्मनि अध्यस्यन्त्यविवेकेन गगनेनी
लतादिवत् ॥ २९॥ नन्वहं जातोस्मि बाल्य
कौमाराद्यवस्थामनुभवामि पश्यामीत्याद्य
नवरतमनुभूयमानस्यात्मनः कथं सविका
रित्वमुच्यते इत्यत्राह देहेन्द्रियगुणानिति
देहेन्द्रियमनोबुद्धिधर्मान्गुणांश्च सत्वादी
न् कर्माणि कर्मेन्द्रियव्यापारान् मिथ्याना

दात्म्येन स्थिते निर्मले मंगलरूपे सच्चिदात्म
के परमात्मनि गुणस्थानि यथा गगने नील
तादिवत् अतस्ते आत्मधर्मा न भवन्ति अपि
तु देहादीनामेवेत्यर्थः ॥१९॥ व्यापृते बु
द्धियेऽज्ञात्मा व्यापारीवाविवेकिनाम् दृ
श्यते अभ्रेषु धावत्सु धावन्निव यथा शशी ॥२०॥
अज्ञानात्मनेसोपाधिः कर्तृत्वादीनि चात्म
नि कल्पयन्ते मुणते चन्द्रे चलनादि यथाम्बु
नः ॥२१॥

ननु कर्तृत्वभोक्तृत्वादिकमात्मनि अनवरतम
नुभूयमानत्वात्कुर्वारमित्याशंकां तदपि तथैव
मिथ्यात्वमाह व्यापृतेष्विति इन्द्रियेषु स्वविष
येषु व्यापृतेषु सत्सु आत्मा व्यवहारी वा विवेकि
नां गुरुशास्त्राद्युपदेशरहितानां दृश्यते ननु
तत्त्वदृष्ट्या यथा मेघखण्डेषु वायुवशाद्धाव
त्सु चन्द्रोपि धावति इति लोके दृश्यते वस्तु
तश्चन्द्रो न धावति तथात्मापीत्यर्थः ॥१९ २०॥

ननुदेहेन्द्रियमनोबुद्ध्यादिरित्येतास्स्वेननानाद्रूप्य
न्ते किमात्मानमाश्रित्य वर्तन्ते नत्याह अज्ञा
नादिति अज्ञानवशात्मानसैवोपाधिः
नस्यैव कर्तृत्वादयो धर्माः तत्वाज्ञान
वशादात्मनि कल्प्यन्ते यथाम्भसस्थूल
नादिकं जले प्रतिफलिते चन्द्रे विवेकतः
कल्प्यन्ते न तद्दात्मनीत्यर्थः ॥ २२ ॥

रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते सु
षुप्तौ नास्ति तन्नाशो तस्माद्बुद्धेस्तु नात्मनः २२
रागेच्छासुखदुःखादीनात्मधर्मान्मन्यन्ते
वैशेषिकादयस्तान्निराकरोति रागेति
रागेच्छासुखदुःखप्रयत्नात्मकं सर्वं बुद्धेरे
व नात्मनः कथं जाग्रत्स्वप्नयोर्बुद्धौ सत्यां
प्रवर्तते सुषुप्तौ तस्या बुद्धेर्नाशो कारणे
लीनेन च प्रवर्तते तस्माद्बुद्धेरेव धर्मा ना

त्मन इति॥ २२ प्रकाशो र्कस्य तोयस्य शै
त्यमग्नेर्यथोष्णता स्वभावः सच्चिदान
न्दनित्यनिर्मलतात्मनः २३ ननु किमा
त्मा कीदृक्स्वभाव इत्याशंक्यात्मस्वभाव
मुपदिशति प्रकाश इति यथा प्रकाशो
र्कस्य स्वभावः तोये शैत्यं अग्नेरुष्णता न
थात्मनोपि सच्चिदानन्दनिर्मलता स्वभा
वः स्वरूपमित्यर्थः॥ २३॥ आत्मनः स

श्चिदंशाश्चबुद्धेरहंतिरिति द्वयम् संयोज्यवा
विवेकेन जानामीति प्रवर्त्तते २४ ननु य
द्यप्यकारणमात्मा नहिं जानामीति प्र
त्ययः कथमित्यपेक्षायामाह आत्म
न इति प्रत्ययनात्मनः सच्चिदंशस्वांशा
हंवृत्तः आत्माभासबुद्धेर्हन्ति स्वेन द्वय
मविवेकेन संयोज्यासंगस्यात्मनः केना
पि संयोगो नास्ति तथाप्यज्ञानवशा

न्मेलनं सम्भाव्य जानामीति मत्ययः अ
हंकार वृत्तिः प्रवर्तते केवले प्रत्यगा
त्मनि किञ्चिद्विकारो नास्तीति भावः २४
आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न
जात्विति जीवः सर्वमलं ज्ञात्वा कर्ता
द्रष्टेति मुह्यति २५ ॥ एतदेव स्पष्टय
ति आत्मनो विक्रिया नास्ति आत्मा
स्वभावादेव विकारशून्यः बुद्धेः क

दाचिदेवबोधशंकानास्ति तथाजीवः
साभासाहंकारः सर्वोसाभासा यन्नः
करणहत्तीनामेवनसाय :पिण्डवदे
कत्वसङ्गतमेवमलमन्यर्थत्तात्वादेहे
क्रियादिकमहमितिविचार्या,हंकर्त्ता
हंदेहेति मन्यते भ्रान्तोभवतीत्यर्थः : २८
रज्जुसर्पवदत्मानं जीवंज्ञात्वाभयंव
हेतू नाहंजीवः परात्मेति ज्ञानस्ववेत्ति

श्री॰
बो॰
२८

र्भयो भवेत् ॥ २६ ॥ आत्मा स्वयमेव स्वस्मि
न्नेवाविवेकेनारोप्य बिभीतीत्याह । र
ज्जु सर्पवदिति यथान्धकारादौ विकार
रहित रज्ज्वादौ सर्पाद्यारोपणं कृत्वा भ
यकम्पितो भवति एवमात्मापि स्वस्मि
ज्जीवत्वमारोप्य सद्वितीयं परिछिन्नं
वित्ताय भय दुःख सागरे मग्नो भवति य
था शास्त्राचार्यप्रसादेन शास्त्रार्थज्ञान

मुत्पन्नं भवति तदा विवेकचक्षुषा स्वात्मानम
खण्डबोधैकज्ञानैकस्वरूपं सम्यक्पश्यन् तेनोना
हं जीवः परमात्माहमिति ज्ञात्वाभयदुःखा
दिरहितः सुखीभवेत् २६ आत्मावभास
यत्येको बुद्ध्यादीनिन्द्रियाणि हि दीपो
घटादिस्वात्मा जडैस्तैर्नावभास्यते २७॥न
न्वात्मात्यन्तं सामीप्यके बुद्धिमनोहंकार
दिभिः कथं नावलोक्यते न ज्ञायते तत्रा

आ॰ बो॰ २७

ह आत्मेति आत्मा केवलं वसन्नपि बुद्धिम
नोऽहंकारादीनवभासयति नैर्जडैर्मन आ
दिभिनावभास्यते यथैकएवदीपो घटा
दीन्सर्वानपि प्रकाशयति प्रकाशितैर्घ
टादिभिर्नावभास्यते तद्वदित्यर्थः २७॥
स्वबोधेनान्यबोधेच्छा बोधरूपतयात्म
नः नदीपस्यान्यदीपेच्छा यथास्वात्म
प्रकाशने २८ आत्मा तु बुद्ध्यहंकारादिभि

र्थैर्विनावभास्यते नहि आत्मज्ञानं ज्ञानान्त
रलाभविनश्यमित्याशंकानेत्याह स्वबोधे
नेति आत्मनोबोधरूपत्वात् स्वबोधेनित्य
सतितस्यात्मनोबोधाज्ञानान्तरापेक्षाना
स्ति अनुरूपत्वात् यथादीपस्यैव स्वप्र
काशने दीपान्तरापेक्षानास्ति तद्वदित्य
र्थः ॥२८॥ निरस्याखिलोपाधीन्ने
तिनेतीतिवाक्यतः विद्यादैक्यंमहा

आ॰
बो॰
२८

महावाक्यैर्जीवात्मपरमात्मनोः २९ यदि तु
आदिभिरात्मानैक्यो न भवेत्तर्हि आत्मज्ञानेन
उपायान्तरं वक्तव्यं स उपायः क इत्यत आह नि
दिध्येत्यादि अथात आदेशो नेति नेतीति अत
न्निरसनादेव वेदवाक्यैर्निखिलोपाधीन्नि
षिध्यात्मानं ज्ञात्वा तत्त्वमसि अयमात्मा ब्र
ह्म तदेवाहमित्यादिवाक्यैर्लक्षणया ब्रह्मात्मै
क्यज्ञानं विद्यात् प्राप्नुयात् अनेन प्रकारे

त्वात्तानवच्छिन्नमित्यर्थः आत्मस्वरूपज्ञाने यनवि
रसनाभावे आत्माज्ञातुमशक्यः यथा नायं स
र्प इति आरोपितस्यापकरणाभावे आत्मा
ज्ञातुमशक्यः यथा नायं सर्प इति २९॥
आविद्यकं शरीरादि दृश्यं बुद्बुथलक्षणं
रूपनद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलम् १०
आरोपितस्यापकरणाभावे रज्जुज्ञानेनो
त्पद्यते नहृदात्मनि रसनाभावेनात्मा ज्ञा

नवाहन्याश्रंकाह देहेन्द्रियादिसर्वद्रष्टृ प्रपंजा
ते ज्ञाविषिद्धिके दृश्यत्वाद्बुद्धवत् तरं नश्च
रं एतत्द्विलक्षणं निर्मलं निरुपाधिकं नित्य
मेकं सच्चिदानन्दात्मकं ब्रह्मैवाहमस्मि इ
ति विद्यात् ततः कृतकृत्यो भवतीत्यर्थः १०
देहान्यत्वान्नमे जन्म जराकार्श्यलयाद
यः शब्दादिविषयैः सङ्गो निरिन्द्रियतया
नवा इत्यादि एवमुक्तेनैन नित्यानन्दात्माद्व

यथाकार्यज्ञानेनापरोक्षतया ज्ञात्वा स्वानु
भवावष्टम्भेनात्मन्येवात्मनो मननप्रकार
माह देहान्यत्वादिति पंचभिः कोशैर्देहा
न्यत्वादिभिः जडदृश्यत्वादिभावस्थूलश
रीरादन्यत्वात् मे जन्मजराकार्श्यलयाद
यो न सन्ति इन्द्रियादिभिरसंगत्वात् मे
शब्दादिविषयभोगेन संगोनुभवो नास्त्ये
व ११॥ अमनस्त्वान्न मे दुःखरागद्वेषभ

यादयः प्राणोह्यमनस्तृप्तो ह्यक्षरात्परतः प
रः ११॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रि
याणि च खंवायुर्ज्योतिरापश्च पृथिवी विश्व
स्य धारिणी १२ कथमिन्द्रियप्राणमनसां
नात्मकतेत्याशंक्याह श्रमै स्त्वादिति श्रु
तिप्रमाणमत्र दर्शयति प्राणइति १२
१२ स्पष्टार्थः॥ निर्गुणोनिष्क्रियो नित्यो
निर्विकल्पो निरंजनः निर्विकारो निरा

कारो नित्यमुक्तोस्मि निर्मलः २४ गुरुप्रसा
दात्स्वानुभवसिद्धमर्थमभिनयति निर्गुण
स्त्वादिगुणाद्यभावान्नित्योपाधयाभावान्
संकल्पविकल्पाभावान्निर्विकल्पः असंग
त्वान्निरंजनः षोडशकलिंगदेहपरत्यत्वा
न्निर्विकारः निरवयवत्वान्निराकारः बन्धा
भावान्नित्यमुक्तः अविद्यानन्कार्यरहित
त्वान्निर्मलः २४ ॥ अहमाकाशवत्सर्वं

या॰
बो॰
२२

बहिरन्तर्गतोच्युतः सदासर्वसमः शुद्धोनिसं
गोनिर्मलोचलः २५ ननुश्वैस्तैर्हेतुभिरेवंवि
शिष्टस्वरूपसत्ताभिधामित्युक्तान्किंविशि
ष्टइत्याह अहमित्याह अकाशवत्सर्वंहृष्यपजा
नस्यबहिरन्तर्गतः अच्युतः सदा
सर्वसमः विषयेष्वपिसमः व्याप्यस्थितः न
थाविशुद्धोनिर्मलः निर्लेपः अचलः इत
स्याचलनाभावात् २५ नित्यशुद्धविमुक्तै

कमखण्डानन्द द्वयम् सत्यंज्ञानमनन्तंयत्परं
ब्रह्माहमेवेतत्॥ २६ ॥ कमखण्डानन्दम
द्वयं द्वितीयाभावात् ३६॥ एवं निरन्तरं ज्ञा
त्वा ब्रह्मैवास्मीति वासना हरत्यविद्या
विक्षेपान्रोगानिव रसायनम् ३७॥ अद्व
यं सत्यंज्ञानमनन्तं यत्परं ब्रह्मेति श्रुत्याप्र
श्रा॰ तिपाद्यते यत्परं ब्रह्मैवाहमस्मि इति स्व
रूपनत्वं कथितम् पूर्वश्लोकोक्तमनन्तवि

रभ्यस्तं सत् फलार्थं साधयति एवमिति एव
मुक्तप्रकारेण ब्रह्मैवाहमस्मीति नैरन्तर्येण
चिरकालाभ्यस्तवासना अविद्याकृतचित्त
विक्षेपान्निःशेषतो नाशयति यथा रसाय
नमौषधं चिरकालसेवितं सद्रोगं निःशेष
तो नाशयति तद्वदित्यर्थः ॥ १६७॥ विवि
क्तदेश आसीनो वितृष्णो विजितेन्द्रियः भा
वयेदेकमात्मानं तमनन्तमनन्यधीः ॥ १६८॥

ब्रह्मानुसन्धाने साधन नियममाह विविक्त इति

विविक्तदेशे जनसङ्गवर्जिते देशे आसीनः सुखो

पविष्टः विरागः सर्वत्राभिलाषरहितः अतए

व निर्जितानीन्द्रियाणि येन सः अनन्तमपरि

च्छिन्नमद्वयमेकमात्मानमनन्यधीः ब्रह्मैवे

वस्थितानि सम्यग्भूतानि कार्याणि यस्य नाहंभा

वयेत् ध्यायेत् ॥ ३८ ॥ आत्मन्येवाखिलं दृश्यं

या० प्रविलाप्य धिया सुधीः भावयेदेकमात्मानं

बो०

निर्मलाकाशवत्सदा॥ ३९ ॥ हृत्पुण्डरीकमध्ये जाग्र
त्तिकायमेकात्मभावनासम्भवः इत्यत आह आ
त्मनीति अखिलं दृश्यजातं सुधीः प्रज्ञावान्
करणः सन् प्रज्ञयाधिया आत्मन्येव समाधि
समये प्रविलाप्य अकर्षेण नाशयित्वा तदा
द्वितीयाभावादेकमात्मानं सदा ज्योत्स्नाका
शवद्भावयेत् अनुतिष्ठेदिति॥ ४० ॥ एवं
लौकिकं सर्वं विहाय परमार्थवित् परिरणे

चिदानन्दस्वरूपेणावतिष्ठते ४०॥ परमार्थदर्शी मुनिर्नामरूपवर्णादिकं सर्वं विहाय परिपूर्णानानन्दस्वरूपेणैवावतिष्ठते इत्यत्राह रूपेति स्पष्टार्थः ४०॥ ज्ञातृज्ञानज्ञेयभेदपरेनात्मनि विद्यते परानन्दैकरूपत्वाद्दीप्यते स्वयमेव तत् ४१॥ ननु प्रमात्रादित्रिपुटीनां वर्तमानत्वप्रतीते कथमेकत्वभावेनेत्याशंक्य परमात्मनि भेदो नास्ति इत्याह ज्ञा

त्रिति ज्ञातृज्ञानज्ञेयभेदः परमात्मनि नवि

द्यते सभेदः कल्पितात्मन्येव भाति ज्ञाना

नन्दैकरूपत्वात् आत्मा स्वयमेव दीप्यतीति

प्रकाशते इति तात्पर्यं ॥ ४१ ॥ एवमात्मा

रण्यां ध्यानमथने सततं कृते उदिताव॑गतिर्ज्वा

ला सर्वाज्ञानेन्धनं दहेत् ॥ ४२ ॥ तर्हि एवं

शुद्धवस्तुध्यातुः प्रत्यक्षफलमाह एवमि

ति आत्मारण्यः आत्मानः कारणमेवार

लि: तस्मिन्मननल वोन्तरात्माध्यानेनत
घोर्मेध्यमथनेन सर्वहुतेनेन नवोऽदिना
ज्वालाहूपावणति: ज्ञानं विद्या अज्ञान
मेवेन्धनं मूलाज्ञानं निःशेषत: सपरिवा
रं नाशयति तदा मम मुक्त: स्वराज्येऽभिष
क्त: कृतकृत्यो भवतीत्यर्थ: ४२५ मत
लेनैव बोधेन पूर्वं सन्तमसि हुते ननग्ना
विर्भवेदात्मा स्वयमेवांशुमानिव ॥४२

जीवपरमात्मनोरन्यत्वैकात्वज्ञानेनाविद्यापरि
कल्पिता अन्यत्वमस्ति निःशेषक्षयमुपयाते स
ति परमात्मा स्वयमेवाविर्भवेदित्याशंक्या
ह अरुणेनेति अरुणप्रकाशेनादावन्धका
ररूपे हते अंशुमान्यथाविर्भवेत् तद्वदात्मा
पीत्यर्थः बोधेनात्मज्ञानेन सम्यक्तमसि हते
सति आत्माविर्भवेदित्यर्थः ॥४२॥ आत्मा
तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया तन्नाशे

मामवद्भाति स्वकराहाभरणं यथा ॥ ४४ ॥

आत्मा सर्वदा परोक्षस्वभावत्वादप्राप्त एव स

आत्मा कदा प्राप्तो भवेदिति शिष्याभिप्रायमाशं

क्याह आत्मेति आत्मा सर्वज्ञत्वगुणः सत्तया

नन्दस्वरूपः सर्वदा प्राप्त एव अविद्यावशा

द्भ्रान्त्या प्राप्त एवाभाति नष्टोऽतदावर

णाविद्यानाशो वाक्यश्रवणात्प्राप्त एव भ

वति कण्ठगतचामीकरन्यायादित्यर्थः ४४

आ॰

बो

स्थाणौ पुरुषवद्भ्रान्त्या कृता ब्रह्मणि जीवता ।
जीवस्य तात्त्विके रूपे तस्मिन्दृष्टे निवर्तते ॥४९॥
ननु जीवस्य परमात्मन्येकत्वं युक्तमित्याशंक्या-
ह स्थाणाविति अन्धकारे स्थिते स्थाणौ पुरु-
षोयमिति चोरशंकया बिभीति तथैवावि-
चाराद्ब्रह्मणि जीवत्वमारोप्यते तथाप्याप्तो-
पदेशाज्जनिते विवेकदृष्ट्या तस्य जीवस्य ता-
त्त्विके रूपे लब्धे तत्त्वंपदार्थैक्ये दृष्टे ज्ञानकालि

नत्वात् इत्यर्थः ४२ नतत्त्वस्यानुभावाद्गुत्प

न्नं तानमज्ञसा अहं ममेति वा तानं ना यतेहि

भ्रमादिवत् ४६॥ अहं ममेति प्रत्यये जाग्रति

कथं नाहमिति प्रत्यय इत्याशंक्य तदपि नष्टे

वस्थेत्याह नत्वेति जीवपरयोरेकत्वाद्गुत्प

न्नं यज्ज्ञानं तदहं ममेति अज्ञानं नाश्यते दिग्भ्र

मादिवत् इति भानुदर्शनवदित्यर्थः ॥४६

आ० बो० सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थि

नम् एवं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा॥ ४८
अहं ममेति भ्रान्त्ययेन हि योगी सम्यग्विवेकज्ञान
वान् सन् विज्ञानेन चक्षुषा सर्वं दृश्यप्रपंचं स्वा
त्मन्येवानुभवेन पश्यतीत्याह सम्यगिति ए
कमात्मानं सर्वं पश्यतीत्यर्थः॥४८॥ आत्मै
वेदं जगत्सर्वमात्मनोन्यन्न विद्यते मृदो यद्व
द्घटादीनि स्वात्मानं सर्वमीक्षते ४९॥ नन्वात्मा
सर्वं न पश्यति भ्रान्त्य द्वविरोधान्नानात्वेन दृश्य

मानमिदं सकलमात्मन्यभेदेन पश्यन्नीत्याह आ

त्मेति इदं सर्वं जगदात्मैवात्मकार्यत्वात् अर्थतो

न्यदात्मनो न किंचिद्विद्यते यथा घटशरावा

दिकं मृत्कार्यं मृदो भिन्नं नास्ति अतः स्वात्मन्ये

व सर्वं दृश्यजातं अभेदेन निरीक्षते वाचार

म्भनं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रु

तेः ॥४८॥ जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधि

आ॰ गुणांस्त्यजेत् सच्चिदानन्दधर्मित्वाद्भवेद्भ्रम

बो॰

रकीटवत् ॥९९॥ एवंभूतावस्थैवाजीवन्मुक्तिरि

त्याह जीवन्मुक्त इति अनादिपरिकल्पितसर्वो

पाधिदेहमनोबुद्ध्यादीन्गुणान्सत्वादीन्परित्यज्ये

ति इयमेव जीवन्मुक्तिरित्युच्यते सच्चिदान

न्दगुणत्वान् भ्रमरकीटवत्सायुज्यमवाप्नो

तीत्यर्थः ॥९९॥ लीलामोहार्णवं हत्वा रागद्वे

षादिराक्षसान् योगी शान्तिसमायुक्तो आ

त्मारामो विराजते ॥१००॥ सच्चिदानन्द आत्मारा

मत्तुरवं निहृत्नीन्याह ॥ तीर्त्वेति मोह एवार्णवः अपर्यन्तत्वात् तं ज्ञानप्लवेन तीर्त्वा निःशेषं ना

शयित्वा रागद्वेषादय एव राक्षसा मोहपरिय

न्यिनः तान्निःशेषतो नाशयित्वा शान्तिस

मायुक्तः शमदमादिसहितः आत्मारामआ

त्मन्येव क्रीडा यस्य स विराजते स्वराज्येनाभि

षिक्तः प्रकाशते अत्रार्थान्तरमुच्यते श्रीरा

रा० मो०

स्यो रामः समुद्रं तीर्त्वा रावणादीन्राक्षसान्ह

त्वा सीनैव भ्रान्तिस्तया समेतो यो ध्यायं विराज
ते ॥२०॥ बाह्यानित्यसुखासक्तिं हित्वात्मसुखनि
र्वृतिः घटस्थदीपवत्स्वस्थो ह्यन्तरेव प्रकाशते ॥२१॥
जीवन्मुक्तस्य लक्षणमाह बाह्येति बाह्येन्द्रि
यविषये नित्यसुखासक्तिं प्रीतिवासनां हि
त्वा तत्र हेतुः आत्मसुखेन निर्वृतः घटस्थ
दीपवदन्तरेव प्रकाशते स्वसाक्षिकमेवात्मा
नुभवसुखमितरैर्न ज्ञायते इत्यर्थः ॥२१॥

उपाधिस्थोऽपि तद्धर्मैर्न लिप्तो व्योमवन्मुनिः
सर्वविन्मूढवत्तिष्ठेन्नासक्तो वायुवच्चरेत् ५८॥
एवमुक्तप्रकारेण जीवन्मुक्तः सन् प्रारब्धसं
क्षयादेव निर्वर्तयितव्यमित्याह उपाधिस्थ इ
ति देहाद्युपाधौ सन्निहितत्वेन स्थितोऽपि मुनि
र्व्योमवद्धर्मैर्न लिप्तः मम कर्मलेपो नास्ति
इति भावयेत् सर्वज्ञोऽपि मूढवत्स्वेकतया व
र्तितव्यं सर्वत्र विषयेषु यदृच्छया प्राप्तेषु

शा॰
बो॰

नासक्तश्चासक्तिरहितः सन् वायुवच्चरेन्नि
वर्तयेत् ॥५५॥ उपाधिविलयाद्विष्णौ निर्विशे
षं विशेन्मुनिः जले जलं वियद्व्योम्नि तेजस्तेज
सि वा यथा ॥५६॥ प्रारब्धकर्मक्षये देहोपाधौ
लीने देहकैवल्यमाह उपाधीति उपाधिभूत
देहद्वयविलये प्रारब्धकर्मसंक्षये मुनिर्योगी
विष्णौ सर्वत्रव्यापके परब्रह्मणि निर्विशेषं
यथाभवति तथा विशेत् अत्राद्यन्तौ न दृष्टान्त

वत् जलेजलंयथा ॥२६॥ यल्लाभान्नापरोलाभो
यत्सुखान्नापरंसुखम् यज्ज्ञानान्नापरंज्ञानं तद्ब्र
ह्मेत्यवधारयेत् ॥ ब्रह्मणः सर्वज्ञानिष्ठायत्वा
त्तटस्थलक्षणेनाभिधानेश्लोकद्वयेन यदि
ति यद्ब्रह्मसाक्षात्कारादपरोलाभोनास्ति
नविद्यते सर्वलाभानांतत्रैवान्तर्भूतत्वात् य
थाब्रह्मानन्दे सर्वानन्दानामन्तर्भावः यत्सुखा
ब्रा॰ गो॰ द्ब्रह्मानुभवसुखादपरंसुखंनास्ति किंतु

ध्येयत्वात् यज्ज्ञानाद्ब्रह्मसाक्षात्कारस्तज्ज्ञानान् अप
रं ज्ञानं नास्ति मोक्षहेतुत्वात् तद्ब्रह्मेत्यर्थ इति निश्चा
नीयात् ॥ ५४ यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पु
नर्भवः यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधार
येत् ५५ ॥ यद्दृष्ट्वा नापरमन्यद्दृष्टव्यम् तेनैव पु
रुषार्थसामर्थ्यत्वात् यद्भूत्वा येनैकं गत्वा पु
नर्भवो जन्मादिकं नास्ति यज्ज्ञात्वा यत्स्वरूपं
ज्ञात्वान्यज्ज्ञेयं नास्ति तदेव ब्रह्मेत्यवधारयेत्

अन्यत्सर्वं हेयतया परित्याज्यमित्यर्थः॥ २२ तिर्यगू
र्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम् अनन्तं नित्य
मेकं यत्तद्ब्रह्मेत्यवधारयेत्॥ २६ तिर्यगूर्ध्वमधः
सर्वं ब्रह्मैव परिपूर्णमित्याह तिर्यगिति स्पष्टा
र्थः॥ २६॥ अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यते
ऽद्वयम् अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारये
त्॥ २७ अखण्डानन्दमेकं ब्रह्म वेदान्तैरतद्व्या
आ॰ बो॰ वृत्तिरूपेणान्यनिरसनेन ज्ञातव्यम् इत्याह अ

त्वदिति स्वभावः ॥२७॥ अखण्डानन्दरूपस्य
तस्यानन्दलवाश्रिताः ब्रह्माद्यास्तारतम्येन
भवन्त्यानन्दिनोऽखिलाः ॥२८॥ तत्र ब्रह्माद
योऽपि निरतिशयानन्दिन एव श्रूयन्ते तत्राह
अखण्डेति ब्रह्मेन्द्रादयः परिच्छिन्नानन्दिन
एव ब्रह्मातु अखण्डानन्दानुभवानन्दरू
पत्वादपरिच्छिन्नमानन्दमेव स्वरूपं यस्य त
स्यानन्दलेशं आश्रित्य ब्रह्मेन्द्रादयोप्यान

न्दिनो भवन्ति आनन्दतारतम्येनैतस्यैवानन्दस्या
न्यानि भूतानि मात्रामुपजीवन्ति इतिश्रुतेः २८
नद्युक्तमखिलं वस्तु व्यवहारस्तुनिप्रिय :
तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले २९
परप्रेमास्पदतया आत्मैव भाति इत्युच्यते
एतदयुक्तं अनात्मादेहादिप्रपंचः प्रिय
तरो न दृश्यते इत्याशंक्याह नहीति अखि
षा॰ लं देहाद्यनात्मा वस्त्वपि नयुक्तं तेनात्म
टी॰

नासंयुक्तमेव प्रियतम लौकिकोपि व्यवहार
स्तद्युक्त एव प्रियतमस्तस्मात्सर्वगतं ब्रह्मान्य
न्नप्रियं यथाकाशे सर्वव्याप्य स्थितमेवावति
ष्ठते तस्मादेवान्यपि ब्रह्मव्याप्तत्वात्प्रियमे
व भाति अत आत्मा एव प्रियतम इति सि
द्धम् ॥ अनुलदस्थूलमह्रस्वमदीर्घमजम
व्ययम अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधा
रयेत ६०॥ नहि आत्मा केन प्रकारेण
सर्वव्याप्य तिष्ठति इति जानीयादिति आ

ऽंकाशाद्दङ्गुत्तमयूपाकारत्वादनुत्वस्थूलमिति
श्रुतेः सत्तारूपेणभातीत्याह अनुपिवतिस्व
प्रार्थः ॥६०॥ यच्चासाभासयतेर्कादिर्भासये
र्यत्तुनभासयते येनेसर्वमिदंभातितद्ब्रह्मेत्य
वधारयेत् ६१॥ पुनस्तद्ब्रह्मज्ञानार्थंश्लोक
त्रयेणप्रपञ्चंरूपयति यच्चासेति यद्व
स्तुभानादिरिति घटपटादिभासयेत् य
था॰ तुभास्येर्कादिभिर्नभासयते ननत्रसूर्यो
बो॰

भाति न च चन्द्रतारका नेमा विद्युतो भान्ति
कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं त
स्य भासा सर्वमिदं विभाति इति श्रुतेः येन
सर्वमिदं भूतं भौतिकं भावरूपं जगद्भाति
तद्ब्रह्मेति जानीयात् ६१॥ स्वयमन्तर्बहि
र्व्याप्य भावयन्नखिलं जगत् ब्रह्म प्रकाश
ते वह्नि प्रतप्तायसपिण्डवत् ६२॥ तप्ता
यः पिण्डवत्स्वयमेवान्तर्बहिर्व्याप्य भाव
यन्नखिलं ब्रह्म प्रकाशते इत्याह स्वयमिति

स्य ह्यार्थः ६२॥ जगद्विलक्षणं ब्रह्म ब्रह्मणो
न्यन्नकिञ्चन ब्रह्मान्यद्भाति चेन्मिथ्या यथा
मरुमरीचिका ६३॥ पुनस्तदेवाह जगदि
ति सर्वं ब्रह्मैव सत्यं न यापि जगद्रूपेण य
दाप भूयति तदा गृह्यते जगद्विलक्षणत्वेन
तत्तत्कार्यत्वेन विचार्य न च वक्तुं शक्यं
ब्रह्मणोन्यन्न विद्यते यदि ततोन्यद्रूप
नेयत्किंचित्तत्तन्मृषैव मरीचिकाजलवदि
त्यर्थः ॥६४॥ द्दश्यते श्रूयते यद्यद्ब्रह्मणो

षा०
टी०

न्यन्न किंचन नानात्वानावनद्ब्रह्म सच्चिदान
न्दमद्वयम् ६४ पुनस्तदेव स्फुटयति दृश्य
ते इति चक्षुषा यद्दृश्यते श्रोत्रेण श्रूयते य
न्मनसा स्मर्यते यद्वा वाचाभिधीयते तत्त्व
ज्ञानात्सर्वं ब्रह्म सच्चिदानन्दमद्वयं ब्रह्म
णोन्यन्न किंचित् अस्तीत्यर्थः ॥ ६४ सर्व
गं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते अज्ञा
नचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ६५॥
नशमादेन विशुद्धसत्त्वः तत्तत्त्वं पश्यति

निष्कलं ध्यायमान इत्यादि यदि सर्वगतं ब्र
ह्म तत्सर्वैः किं न दृश्यते इत्याशंक्य चक्षुरा
दिभिर्नागृह्यते इत्यनया श्रुत्या प्रतिपाद
यति न चक्षुषेति न संदृशे तिष्ठति रूपम
स्य न चक्षुषा पश्यति कश्चिदेनम् हृदा
मनीषा मनसाभिक्लृप्तो य एतं विदुरमृता
स्ते भवन्ति य एतज्ज्ञानचक्षुः सर्वगतम
पि सच्चिदानन्दं ब्रह्म पश्यति यथा स
श्वा॰ कामूमानपि भानुमन्धो न पश्यति तान
बो॰

प्रसादेन चक्षुषा विमुक्तसत्त्वः निर्हृतावि
द्यः सदा सर्वत्र ब्रह्मैव पश्यति इत्यर्थः ६५
स्मरणादिभिरुद्दीप्तो ज्ञानाग्निपरिस्फुरितः
जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयं ॥ ६६
एवमुक्तरीत्यानुभवसम्पन्नस्यापि तदाभ्या
सरहितस्य वासनावशात् किंचिदज्ञानं
सम्भवति तत्परिहारार्थं पुनः स्मरणादि
कुर्यात् इत्याह स्मरणादिभिरिति जीवः

प्रत्यगात्मा ० तत्त्वश्रवणार्थस्य स्मरणमनना
दिभिरुद्दीप्तः प्रकाशितः ज्ञानमेवाग्नि
स्तेन परितापितो भाति शोधित इत्यर्थः
सर्वसंसारमूलत्वाज्ञानमलान्मुक्तः स्वयमेव
सम्यक् प्रकाशते यथाग्निपरितापितस्व
र्णं दोषाधिकं हित्वा स्वरूपेण प्रकाशते त
द्वदित्यर्थः ॥६६॥ हृदाकाशोदितो ह्या
आ॰ बो॰ त्माबोधभानुस्तमोपहः सर्वव्यापी सर्व

धारी येन सर्वं प्रकाशते ६७॥ एवं मुनोधितो
जीवः परमात्मा हृदाकाशे ऽदितः सन् न
मोन्तानमुपसंहरन्भानुवत्सर्व स्वरूपेण प्र
काशते इत्याह हृदिति बोधभानुः सर्व
स्याधारभूतत्वात्सर्वव्यापी सर्वधारी च प्रो
वं स्यष्टम् ॥ ६७॥ दिग्देशकालाद्यनपेक्षि
सर्वगं शीताद्हिन्नित्यसुखं निरंजनम्
यः स्वात्मतीर्थं भजते विनिष्क्रियः स सर्व

वित्सर्वगतोह्यमृतो भवेत्॥ ६८॥ नन्वात्मनोज्ञान
प्रतिबन्धको दुरितपरिहारार्थं प्रयागतीर्थयात्रो
द्योगः कर्तव्य इत्याशंक्यात्मतीर्थ[illegible]स्नानस्य
न किंचित्कर्तव्यमित्याह दिगिति यो विनिष्क्रियः
परमहंसः स्वात्मतीर्थं भजते स सर्ववित्सर्वगः
सर्वत्र परमार्थस्वरूपत्वात् अमृतो मुक्तो भवेत् कि
यं भूतं स्वात्मतीर्थं दिग्देशकालाद्यनपेक्षमेव
सर्वगं शीतादीनि द्वन्द्वदुःखानि हरतीति शी
तादिहृत् नित्यसुखं मोक्षानन्दप्रापकत्वात्
इतरतीर्थेषु तद्विपरीतं द्रष्टव्यम् अत आत्मतीर्थ

स्नानस्य न किंचिदवशिष्यते इति भावः॥
६८॥ आत्मबोधाख्यो ग्रन्थः शंकराचार्य-
विरचितः समाप्तः॥ शुभम्॥ ॥ श्रीः॥